# ॥ विष्णोरष्टाविंशति नाम स्तोत्रम् ॥

**|| viṣṇoraṣṭāviṁśati nāma stotram ||**

मत्स्यं कूर्मं वराहं च वामनञ्च जनार्दनम् ।

गोविन्दं पुण्डरीकाक्षं माधवं मधुसूदनम् ॥ १ ॥

matsyaṁ kūrmaṁ varāhaṁ ca vāmanañca janārdanam |

govindaṁ puṇḍarīkākṣaṁ mādhavaṁ madhusūdanam || 1 ||

पद्मनाभं सहस्राक्षं वनमालं हलायुधम् ।

गोवर्धनं हृषीकेशं वैकुण्ठं पुरुषोत्तमम् ॥ २ ॥

padmanābhaṁ sahasrākṣaṁ vanamālaṁ halāyudham |

govardhanaṁ hṛṣīkeśaṁ vaikuṇṭhaṁ puruṣottamam || 2 ||

विश्वरूपं वासुदेवं रामं नारायणं हरिम् ।

दामोदरं श्रीधरं च वेदाङ्गं गरुडध्वजम् ॥ ३ ॥

viśvarūpaṁ vāsudevaṁ rāmaṁ nārāyaṇaṁ harim |

dāmodaraṁ śrīdharaṁ ca vedāṅgaṁ garuḍadhvajam || 3 ||

अनन्तं कृष्ण गोपालं जपतो नास्ति पातकम् ।

गवां कोटिप्रदानस्य अश्वमेधशतस्य च ॥ ४ ॥

anantaṁ kṛṣṇa gopālaṁ japato nāsti pātakam ।

gavāṁ koṭipradānasya aśvamedhaśatasya ca ।। 4 ।।

कन्यादानसहस्राणां फलं प्राप्नोति मानवः ।

अमायां वा पोर्णमस्यां एकादश्यां तथैव च ॥ ५ ॥

kanyādānasahasrāṇāṁ phalaṁ prāpnoti mānavaḥ ।

amāyāṁ vā pourṇamasyām ekādaśyāṁ tathaiva ca ।। 5 ।।

सन्ध्याकाले जपेन्नित्यं प्रातःकाले तथैव च ।

मध्याह्ने च जपेन्नित्यं सर्वपापैः प्रमुच्यते ॥ ६ ॥

sandhyākāle japennityaṁ prātaḥkāle tathaiva ca ।

madhyāhṇe ca japennityaṁ sarvapāpaiḥ pramucyate ।। 6 ।।

॥ इति शिवम् ॥

।। iti śivam ।।

www.kamakotimandali.com